# 1954G Chintamani Parshvanath Stavan

In Anekant

ॐ अर्हम्

वार्षिक मूल्य ६)




एक किरण का मूल्य ।)

वर्ष १२
किरण ११

वीरसेवामन्दिर, १ दरियागंज, देहली
चैत्र वीर नि० संवत २४८०, वि० संवत २०११

अप्रैल
१९५४

सोमसेन-विरचितम्

## चिन्तामणि-पार्श्वनाथ-स्तवनम्

श्रीशारदाऽऽधारमुखारविन्दं सदाऽनवद्यं नतमौलिपादम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभं नौमि निरस्तपापम् ॥१॥
निराकृताऽरातिकृतान्तसङ्गं सन्मण्डलीमण्डितसुन्दराङ्गम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥२॥
शशिप्रभा-रीतियशोनिवासं समाधिसाम्राज्यसुखावभासम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥३॥
अनल्पकल्याणसुधाब्धिचन्द्रं सभावलीसून-सुभाव-केन्द्रम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥४॥
करालकल्पान्तनिवारकारं कारुण्यपुण्याकर-शान्तिसारम्।
चिन्तामणिं चिन्ततकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥५॥
वाणीरसोल्लासकरीरभूतं निरञ्जनाऽलंकृतमुक्तिकान्तम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥६॥
क्रूरोपसर्गं परिहर्तुमेकं वाञ्छाविधानं विगताऽपसङ्गम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥७॥
निरामयं निर्जितवीरमारं जगद्धितं कृष्णपुरावतारम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥८॥
अविरलकविलक्ष्मीसेनशिष्येन लक्ष्मी-विभरणगुणपूतं सोमसेनेन गीतम्।
पठति विगतकामः पार्श्वनाथस्तवं यः सुकृतपदनिधानं स प्रयाति प्रधानम् ॥९॥

प्रेस —
१२ पाइंट ब्लाक टाइप

## चिन्तामणि-पार्श्वनाथ-स्तवनम्

सोमसेन विरचितम्

श्रीशारदाऽऽधार मुखारविन्दं सदाऽनवद्यं नतमौलिपादम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥१॥

निराकृताराति कृतान्तसङ्गं सन्मण्डलीमण्डितसुन्दराङ्गम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥२॥

शशिप्रभाकीर्तियशोनिवासं समाधिसाम्राज्यसुखावभासम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥३॥

अनल्पकल्याणसुधाब्धिचन्द्रं सभावलीसून-सुभाव-केन्द्रम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥४॥

करालकल्पान्तनिवारकारं कारुण्यपुण्याकरशान्तिसारम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥५॥

वाणीरसोल्लासकरीरभूतं निरञ्जनाऽलङ्कृतमुक्तिकान्तम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥६॥

क्रूरोपसर्गं परिहर्तुमेकं वाञ्छाविधानं विगताऽप्रसङ्गम्।
~~निरामयं निर्जितवीरमारं जगद्धितं~~
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥७॥

निरामयं निर्जितवीरमारं जगद्धितं कृष्णपुरावतारम्।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम्॥८॥

अविरलकविलक्ष्मीसेनशिष्येण लक्ष्मीनिभरणगुणपूतं सोमसेनेन गीतम्। ~~[illegible]~~।
पठति विशदकामः पार्श्वनाथस्तवं यः सुकृतपदनिधानं स प्रयाति प्रधानम्॥९॥